National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 154-157
© 2026 NJHSR
www.sanskritarticle.com

श.कृपाभास्कर:
शोधच्छात्र:, शैवागम विभाग:,
श्री वेङ्कटेश्वर वेदविश्वविद्यालय:,
तिरुपति:

Correspondence:
श.कृपाभास्कर:
शोधच्छात्र:, शैवागम विभाग:,
श्री वेङ्कटेश्वर वेदविश्वविद्यालय:,
तिरुपति:

श्रीमत्-चिन्त्यागमस्य समालोचनम्

श.कृपाभास्कर:

अस्माकं भारतीय शास्त्रेषु आगमा अतिप्राचीनतमास्सन्ति । आगमा: शैव-शाक्त-वैष्णवभेदेन त्रैविध्यं भवन्ति। तेषु शैवागमा: साक्षात् शिवमुखोद्भूताः भवन्ति।

सर्वज्ञस्सर्वानुग्राहक: परमेश्वर: प्रलये स्वस्मिन् विलीनान् वेदागमान् सृज्यमाना: प्राणिन एतेभ्यो वेदागमवाक्येभ्य: कर्मोपासनादिकं ज्ञात्वा तदनुष्ठानेन कृतार्था: भूत्वा मोक्षं प्राप्नुवन्तु इति अभिप्रायेणैव उपदिशति स्म ।

महान्त: वेदशिवागमविद्वांस उच्यन्ते यत् –

वयं वेदशिवगमयो: भेदं न पश्याम: वेदोऽपि शिवागम: ।

शिवागमोऽपि वेद: । वेदस्त्रैवर्णिक: । शिवागमस्तु सर्ववेद इति ।

“आगम” पदार्थ: -

आगतं शिववक्त्रेभ्य: गतञ्च गिरिजामुखे ।
मतञ्च वासुदेवेन आगमिति विदुर्बुधा: ।।

अस्मात् मूलागमवचनात् आगतं-गतं-मतं इति त्रयानां पदानां अद्यक्षरमेलनात् “आगम” इति पद: प्राप्यते इति ज्ञातुं शक्यते ।

अनेन मूलागम वचनेन अस्यगमस्योत्पति: शिवमुखात् भवति तथा अस्य आद्या अन्तेवासिनी गिरिजा तथा च अयं वासुदेवस्य मतमित्यपि ज्ञायते ।

अष्टाविशति आगमा: -

पूर्वकारणागमे तन्त्रावतारविधिपटले

“कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा ।
दीप्तं सूक्ष्मं सहस्रं च अंशुमान् सुप्रभेदकम् ।।
विजयं चैव निश्वासं स्वायंभुवमथाऽनलम् ।
वीरञ्च रौरवञ्चैव मकुटं विमलं तथा ।।
चन्द्रज्ञानञ्च बिम्बञ्च प्रोद्गीतं ललितं तथा ।
सिद्धं सन्तानं शर्वोक्तं पारमेश्वरमेव च ।।
किरणं वातुलं चैव अष्टाविंशति सङ्ख्यया ।।”

1.कामिकम् 2.योगजम् 3.चिन्त्यम् 4.कारणम् 5.अजितम् 6.दीप्तम् 7.सूक्ष्मम् 8.सहस्रम् 9.अंशुमान् 10.सुप्रभेदकम् 11.विजयम् 12.निश्वासम् 13.स्वायम्भुवम् 14.अनलम् 15.वीरम् 16.रौरवम् 17.मकुटम् 18.विमलम् 19.चन्द्रज्ञानम् 20.बिम्बम् 21.प्रोद्गीतम् 22.ललितम् 23.सिद्धम् 24.सन्तानम् 25.सर्वोक्तम् 26.पारमेश्वरम् 27.किरणम् 28.वातुलम्

इत्थम् एते अष्टाविशति आगमा:

शिवस्य पञ्च मुखानि सन्ति। 1.सद्योजातम्, 2.वामदेवम्, 3.अघोरम्, 4.तत्पुरुषम्,

5.ईशानम् इति। एभ्यः पञ्चभ्यः वक्त्रेभ्यः शिवेन उपर्युक्ता अष्टाविंशतिः शिवागमाः उद्भूताः।

तदुक्तं उत्तरकारणागमे तन्त्रावतारविधिपटले-

"कामिकाद्यजितान्तश्च सद्योजात मुखोद्भवम् ।
दीप्तादि सुप्रभेदान्ता वामदेवमुखोवम्।।
विजयारभ्य वीरान्ता पञ्च ते घोरमूर्तये।
रौरवादीश्च बिम्बान्तं पुंवक्त्रे च समुद्भवम्।।
प्रोद्गीताद्यष्टतन्त्रानि ईशानेन समुद्भवम्"।

1.सद्योजातमुखोद्भूताः आगमाः -

1.कामिकम् 2.योगजम् 3.चिन्त्यम्
4.कारणम् 5.अजितम्

2.वामदेवमुखोद्भूताः आगमाः

1.दीप्तम् 2.सूक्ष्मम् 3.सहस्रम्
4.अंशुमान् 5.सुप्रभेदम्

3.अघोरमुमुखोद्भूताः आगमाः

1.विजयम् 2.निश्वासम् 3.स्वायम्भुवम्
4.अनलम् 5.वीरम्

4.तत्पुरुषमुखोद्भूताः आगमाः

1.रौरवम् 2.मकुटम् 3.विमलम्
4.चन्द्रज्ञानम् 5.बिम्बम्

5.ईशानमुखोद्भूताः आगमाः

1.प्रोद्गीतम् 2.ललितम् 3.सिद्धम्
4.सन्तानम् 5.सर्वोक्तम् 6.पारमेश्वरम्
7.किरणम् 8.वातुलम्

एतेषामागमानां उपागमाः सप्ताधिकद्विशतसंख्याकाः भवन्ति।

तदुक्तं उत्तरकारणागमे तन्त्रावतारविधिपटले-

"तन्त्राणां कामिकादीनां ग्रन्थसंख्या प्रकीर्तिताः ।।
नारसिंहश्च वक्तारं भैरवोत्तरमेव च ।
कामिकस्य त्रयो भेदा सुधा सन्तादितारकौ ।।
वीणा शिखोत्तरश्चैव आत्मयोगन्तथैव च ।
योगजस्य तु भेदानि पञ्चधा कीर्तितानि वै।।
पापनाशं परोद्भूतं सुचिन्त्यममृतान्वितम्।
सुभगं वामसंज्ञं तु चिन्त्यभेधास्तु षड्विधा ।।
माहान्तं कारणं तन्त्रं पावनं भीमसंहिता ।
विद्वेषं मारकश्चैव सप्तधा कारणस्य तु ।।
पार्वती च परोद्भूतं प्रभूतं पद्मसंहिता ।
अजितस्य चतुर्भेदा अमेयाख्यमतः परम् ।।
असंख्यमब्जमश्चाद्यमानन्दममितौजसम् ।
अद्भुदं मानवोन्द्भुतमक्षयं दीप्तमेव च।।
सूक्ष्मस्य सूक्ष्ममेकन्तु अजितं मण्डलं तथा।
प्रमेयाजातिभागश्च प्रबुधं विबुधं तथा।।
हस्तशुद्धमलङ्कारं बोधं साहस्रकोदश।
काश्यपं वासवं नीलं लोहितं भूततन्त्रकम् ।।
विद्यापुराणमैन्द्रश्च आत्मालङ्कारमेव च।
वासिष्ठं गौतमं ब्राह्मं ईशानोत्तरमेव च।।
प्रकारणं तथाचांशुमानो द्वादशभेदकम् ।
सुप्रभेदं महाशास्त्रं अभेदमिति कीर्तितम् ।।
कौबेरश्चाथ विमलं सौम्यञ्श्चैव तथोद्भवम्।
मृत्युनाशमघोरश्च महाघोरमतः परम् ।
परमेश्वराच्च विजयं विजयस्याष्टभेदकाः ।।
निश्वासोत्तरतन्त्रञ्श्च मनो निश्वासमेव च।
निश्वासाख्यं महातन्त्रं निश्वासोर्ध्वमुखोदयम् ।
निश्वासनिधनश्चैव मन्त्रेनिश्वासमेव च।।
निश्वासकारिका चैव निश्वासं घोरमेव च।
निश्वासश्चाष्टधा प्रोक्तं प्रजापतिमतं तथा ।।
पन्यश्च द्विविधं विद्यात् स्वायम्भुवविशेषतः ।
आग्नेयं व्योमतन्त्रन्तु आग्नेयस्य द्विधामतम् ।।
प्रस्तरं फुल्लनयनं प्रबोधं बोधकन्तथा।
शकटं मोहविजयं प्रमोहं शकटासिकम् ।।
विलेघनं विलेभद्रं वीरतन्त्र्यं त्रयोदश।
कालाख्यं कालदहनं रौरवं रौरवोत्तरम् ।।
महाकालमतश्चान्द्रं रौरवे षड्विधं स्मृतम्।
मकुटोत्तरश्च मकुटं मकुटस्य द्विधा स्मृतम् ।।
वृषगुह्यं यथाक्रान्तं वृषभं वृषभोत्तमम् ।
सुदन्तमति भेदश्च रौद्रभेदं तथैव च।।
आरेवतं सुभद्रश्च अतिक्रान्तमलंकृतम् ।
अर्चितं त्वदृणासश्च अनन्तं मारणं तथा ।।
भेदो विमतन्त्रस्य षोडशोपरि कीर्तिताः ।
एकदशपुराणश्च स्थाण्वाख्या नन्दिकेश्वरम् ।।
स्थिराख्यं शङ्करप्रोक्तं श्रीमुखं शिवभक्तकम् ।
कल्पभेदमिति प्रोक्तं शिवसन्तानमेव च।।
देव्यामताख्यतन्त्रश्च शिवशेखरमेव च।
वारुणश्चैव वायव्यं चन्द्रज्ञानश्चतुर्विधम् ।।
चतुर्वक्त्रश्च संस्तोभं प्रतिबिम्बमयोगजम् ।
तुटिनीलश्च तौटीश्च अर्थालङ्कारमेव च।
तुलावृत्ययमेवश्च कुट्टिमाख्यलयोगतम् ।।
पट्टशेखरमेवश्च महाविद्या महासुरम्।
नैऋती तिथिविख्याश्च मुखं बिम्बस्य भेदकम् ।।
पिङ्गलामृद एवश्च दण्डयौ पाशबन्धकम् ।
परागं कवचं कौरं शिवज्ञानं धनुर्धरम् ।।
कालज्ञानश्च विज्ञानं आयुर्वेदश्च गन्तकम् ।
भरतश्च धनुर्वेदं मानोद्यं सर्वदंष्ट्रकम् ।।
प्रोद्गीताख्यस्य तन्त्रस्य भेदं षोडश एव च ।
ललितोत्तरकौमारं ललिताख्यमतःपरम् ।।
ललितस्य त्रयोभेदा शालाख्यं शक्तिमण्डलम् ।
सारोत्तरश्चमैशान्यं सिद्धतन्त्रं चतुर्विधम् ।।
अमेरशं सुराध्यक्षं लिङ्गाध्यक्षमसंख्यकम् ।
अनिलं शांकरं द्वन्द्वं सन्ताने सप्तभेदकाः ।।
ईशानं शिवधर्मश्च शिवधर्मोत्तरं तथा।

दिव्यप्रोक्तं कुबेराख्यं शार्वोक्तस्यैह पञ्चकम्।।
हंसं पद्मञ्च मातङ्गं सामान्यं यक्षणं तथा।
पुष्कलं सुप्रियायोगं सप्तधा परमेश्वरे।।
गारुडं नैऋतं नीलं रूक्षं भानुकमेव च।
प्रबुद्धं येनकं बुद्धं कालाख्यं किरणेन च।।
वातुलोत्तरतन्त्रञ्च कालज्ञानं पुरोहितम्।
श्रेष्ठं धर्मात्मकं शर्वं शुद्धं नित्यमहारमम् ।।
विश्वं विश्वात्मकं तत्वं द्वादशं स्मृतवातुले।
मूलभेदोपभेदाश्च समासात् परिकीर्तितम्" ।।

❖ श्रीमत् कामिकागमस्य-त्रयः
➢वक्तारम्, भैरवोत्तरम्, नारसिम्हागमम् ।
❖ श्रीमत् योगजागमस्य-पञ्च
➢तारम्, वीणाशिखोत्तरम्, आत्मयोगम्, सन्तम्, सन्ततिः ।
❖ श्रीमत् चिन्त्यागमस्य-षट्
➢सुचिन्त्यम्, सुभगम्, वामम्, पापनाशम्, परोद्भवम्, अमृतम् ।
❖ श्रीमत् कारणागमस्य-सप्त
➢पावनम्, मारणम्, दौर्गम्, माहेन्द्रम्, भीमसंहिता, कारणम्, विद्वेषम् ।
❖ श्रीमत् अजितागमस्य-चत्वारः
➢प्रभूतम्, परोद्भवम्, पार्वतीसंहिता, पद्मसंहिता ।
❖ श्रीमत् दीप्तागमस्य-नव
➢अमेयम्, अब्दम्, आच्छाद्यम्, असङ्ख्यम्, अमितौजसम्, आनन्दम्, माधवोद्भवम्, अद्भुतम्, अक्षयम् ।
❖ श्रीमत् सूक्ष्मस्य-एकः
➢सूक्ष्मम् ।
❖ श्रीमत् सहस्रागस्य-दश
➢अतीतम्, मङ्गलम्, शुद्धम्, अप्रमेयम्, जातिभाक्, प्रबुद्धम्, विबुधम्, हस्तम्, अलङ्कारम्, सुबोधकम् ।
❖ श्रीमत् अंशुमदागमस्य-द्वादश
➢विद्यापुराणतन्त्रम्, वासवम्, नीललोहितम्, प्रकरणम्, भूततन्त्रम्, आत्मालङ्कारम्, काश्यपम्, गौतमम्, ऐन्द्रम्, ब्राम्हम्, वासिष्ठम्, ईशानोत्तरम् ।
❖ श्रीमत् सुप्रभेदस्य- नास्ति।
➢उपभेदः नास्ति ।
❖ श्रीमत् विजयागमस्य-अष्ट
➢उद्भवम्, सौम्यम्, अघोरम्, मृत्युनाशनम्, कौबेरम्, महाघोरम्, विमलम्, विजयम् ।
❖ श्रीमत् निश्वासागमस्य-अष्ट
➢निश्वासम्, निश्वासोत्तरम्, निश्वासमुखोदयम्, निश्वासनयनम् निश्वासकारिका, निश्वासघोरम्, निश्वासगुह्यम्, मन्त्रनिश्वासम् ।
❖ श्रीमत् स्वायम्भुवागमस्य-त्रयः
➢प्रजापतिमतम्, पद्मम्, नलिनोद्भवम् ।
❖ श्रीमत् अनलागमस्य-द्वे
➢आग्नेयम्, व्योमतन्त्रम् ।
❖ श्रीमत् वीरागमस्य-त्रयोदश
➢प्रस्तरम्, फुल्लम्, अमलम्, प्रबोधकम्, अमोहम्, मोहसमयम्, शकटम्, शकटादिकम्, भद्रम्, विलेखनम्, वीरम्, हलम् बोधभोगम् ।
❖ श्रीमत् रौरवागमस्य-षट्
➢कालाख्यम्, कालदहनम्, रौरवम्, माहाकालमतम्, ऐन्द्रम्, रौरवोत्तरम् ।
❖ श्रीमत् मकुटस्य-द्वे
➢मकुटं, मकुटोत्तरम् ।
❖ श्रीमत् विमलस्य-षोडश
➢अनन्तम्, भोगम्, आक्रान्तम्, वृषपिङ्गम्, वृषोदरम्, वृषोद्भूतम्, रौद्रम्, सुदन्तम्, धारणम्, आरेवतम्, अतिक्रान्तम्, अट्टहासम्, भद्रविधम्, अर्चितम्, अलङ्कृतम्, विमलम् ।
❖ श्रीमत् चन्द्रज्ञानागमस्य-चतुर्दश
➢स्थिरम्, स्थाणुः, महान्तम्, वारुणम्, नन्दिकेश्वरम्, एकपादपुराणम्, शाङ्करम्, नीलरुद्रकम्, शिवभद्रम्, कल्पभेदम्, श्रीमुखम्, शिवशासनम्, शिवशेखरम्, देवीमतम् ।
❖ श्रीमत् बिम्बस्य-पञ्चदश
➢चतुर्मुखम्, समस्तोभम्, प्रतिबिम्बम्, अयोगजम्, आत्मालङ्कारम्, वायव्यम्, तौटिकम्, तुटिनीरकम्, कुट्टिमम्, तुलायोगम्, कलाध्ययम्, महासौरम्, पट्टशेखरम्, नैर्ऋतम्, महाविद्या ।
❖ श्रीमत् प्रोद्गीतस्य-षोडश
➢वराहम्, कवचम्, पाशबन्धम्, पिङ्गलामतम्, अङ्कुशम्, दण्डधरम्, धनुर्धरम्, शिवज्ञानम्, विज्ञानम्, श्रीकालज्ञानम्, आयुर्वेदम्, धनुर्वेदम्
सर्पदंष्ट्रविभेदनम् गीतकम्, भरतम्, आतोद्यम् ।
❖ श्रीमत् ललितस्य-त्रयः
➢ललितम्, ललितोत्तरम्, कौमारम् ।
❖ श्रीमत् सिद्धागमस्य-चत्वारः
➢सारोत्तरम्, औशनसम्, शालाभेदम्, शशिमण्डलम् ।
❖ श्रीमत् सन्तानागमस्य-सप्त
➢लिङ्गाध्यक्षम्, सुराध्यक्षम्, अमरेश्वरम्, शङ्करम्, असङ्ख्यम्, अनिलम्, द्वन्द्वम् ।
❖ श्रीमत् शर्वोक्तागमस्य-पञ्च
➢शिवधर्मोत्तरम्, वायुप्रोक्तम्, दिव्यप्रोक्तम्, ईशानम्, सर्वोद्गीतम्।
❖ श्रीमत् पारमेश्वरस्य-सप्त
➢मातङ्गम्, यक्षिणीपद्मम्, पारमेश्वरम्, पुष्करम्, सुप्रयोगम्, हम्सम्, सामान्यम् ।
❖ श्रीमत् किरणागमस्य-नव
➢गारुडम्, नैर्ऋतम्, नीलम्, रूक्षम्, भानुकम्, धेनुकम्, कालाख्यम्, प्रबुद्धम्, बुद्धम् ।
❖ श्रीमत् वातुलागमस्य-द्वादश
➢वातुलम्, वतुलोत्तरम्, कालज्ञानम्, प्ररोहितम्, सर्वम्, धर्मात्मकम्, नित्यम्, श्रेष्ठम्, शुद्धम्, महाननम्, विश्वम्, विश्वात्मकम् ।

आगमानां शिवभेदः रुद्रभेदश्च

आगमानां शिवभेदः रुद्रभेदश्चेति द्वैविध्यं लक्ष्यते। तथा च निरूपितं कारणागमे –

पूर्वे तेषु दश प्रोक्तं शिवभेदेति संज्ञिकम् ।
अष्टादशमहातन्त्रं रुद्रभेदमिति स्मृतम् ।।[1]

अत्र कामिक योगज चिन्त्य कारण सहस्र अजित दीप्त सूक्ष्म - अंशुमान् - सुप्रभेदकेति दश आगमाः स्वीयोपागमसहिताः शिवभेदाः इति उच्यन्ते। विजयागमात् वातुलपर्यन्तम् अष्टादश आगमाः स्वीयोपागमसहिताः रुद्रभेदाः इति उच्यन्ते।

शिवभेदागमानां प्रत्येकं त्रय: त्रय: श्रोतर: विद्यन्ते , रुद्रभेदागमानां प्रत्येकं द्वौ द्वौ श्रोतारौ स्त: ।

आगमपादाः

प्रत्येकं आगमः चतुर्षु पादेषु विभक्तः भवति । तत्र प्रथमः पादः ज्ञानपाद इत्युच्यते। द्वितीयः पादः क्रियापादः, तृतीयश्च योगपादः चतुर्थः पादः चर्यापादः इति व्यपदेशः। यद्यपि प्रत्येकं उपागमोऽपि ज्ञान क्रिया योग - चर्या इति चतुर्भिः पादैः विभक्तः अस्ति।

ज्ञानपादेन पतिपशुपाशानां लक्षणं ज्ञायते। क्रियापादेन कर्षणादि प्रतिष्ठान्तक्रियाः, उत्सव-प्रायश्चित्तनित्यनैमित्तिककाम्यपूजाः, समय-विशेषनिर्वाण दीक्षाः वर्णाश्रमधर्माश्च कथ्यन्ते। ज्ञायन्ते

योगपादेन प्राणायामादीनां लक्षणम्, आत्मशुद्धिः, अन्तर्यागः इत्यादयः ।

चर्यापादेन पूजोपयुक्तान्युपकरणानि, तत्क्रमाश्च उच्यन्ते।

प्रत्येकं पादाः पटलैः विभक्ताः सन्ति । पटलानां संख्या सुनिश्चिता नास्ति । कुत्रचित् बहवः पटलाः कुत्रचिच्च न्यूनाः पटलाः सन्ति। प्रत्येकं पटले अनेके श्लोकाः भवन्ति। श्लोकानां संख्या पटले सुनिश्चिता नास्ति । कुत्रचित् विंशतिः, कुत्रचित् शताधिकाः श्लोकाः भवन्ति। श्लोकेषु विद्यमानः स्वरवर्णः शिवरूपः, व्यञ्जनवर्णः शक्तिरूपः इति पौष्करागमः कथयति।

सिद्धान्तशैव:-

एते अष्टाविंशति आगमाचार एव सिद्धान्तागमाचार इति उच्यते

तदुक्तं सुप्रभेदागमे -

शैवं पुनश्चतुर्भेदं वाम दक्षिणमेव च ।
मिश्रश्चैव तु सिद्धान्तं तेषु सिद्धान्तमुत्तमम् ।।
अष्टाविंशति भेदेन सिद्धान्तं शृणु तत्वत ।। **

एवं अष्टाविंशतिशिवागमाः सिद्धान्तपदेन उच्यते।

सिद्धान्ताचार: एव वैदिकाचार:

तदुक्तं मकुटागमे -

सिद्धान्तो वेदसारत्वादन्यद्वेदबहिष्कृतम्।
सिद्धान्तविहिताचारो वैदिकाचार उच्यते ।।

श्रीमत्-चिन्त्यागम:

अष्टाविंशतिमूलागमेषु शिवभेदेप्रथमदशमेषु तृतीय: अयं चिन्त्यागमः।

सुप्रभेदागमे तन्त्रावतारविधिपटले-

"चिन्त्यं सुदीप्तसंज्ञस्य प्रोक्तं शतसहस्रकैः ।
दीप्ताच्च गोपः प्राप्तः ततः प्राप्ता तु चाम्बिका ।।"-इति

अयं आगमः प्रथमतः परमेश्वरेन सुदीप्ताय उपदिष्ट: भवति , सुदीप्तात् गोपति: प्राप्त: , गोपते: प्राप्ता अम्बिका ।

अस्य चिन्त्यागमस्य षडुपागमाः सन्ति-

तदुक्तं श्रीमत्सुप्रभेदागमे

"चिन्त्यं सुभगं वामं पापनाशं परोद्भवम् ।
अमृतं चिन्त्यतन्त्रस्य षड्विधं तत् प्रकीर्तितम् ।।"इति

1.चिन्त्यं 2.सुभगं 3.वामं 4.पापनाशं 5.परोद्भवम् स्6.अमृतं

अस्य चिन्त्यागमस्य ग्रन्थसङ्ख्यातु लक्ष: (शतसहस्रक:) अपि तु आधुनिककाले तालपत्रेभ्य:

द्विसहस्राधिका: श्लोका एव लभ्यन्ते |

अस्यगमस्य लब्धा: पटला:

1 तन्त्रावतारविधि:, 2 मन्त्रोद्धारविधि:, 3 शौचाचमनविधि:, 4 स्नानकर्मविधि:, 5सन्ध्यानुष्ठाविधि:, 6अर्चनाङ्गविधि:, 7 नित्यार्चनविधि:, 8 शिवार्चनविधि:, 9शिवयागविधि:, 10 अष्टत्रिंशत्कलान्यासविधि,11द्रव्यशुद्धिपटल:,12सौरपूजाविधि:, 13पुण्याहविधि:, 14पञ्चगव्यविधि:, 15पञ्चामृतविधि:, 16 कलशस्थापनविधि:, 17पञ्चावरणार्चनविधि:, 18 नैवेद्यविधि:, 19 सायरक्षाविधि:,20 लिङ्गस्थपनविधि:, 21अर्धनारीश्वरविधि:, 22 अग्निकार्यविधि:, 23 आर्द्राविधि:, 24 विषुवायनविधि:, 25 मासपूजाविधि:,26 मार्गशीर्षमासपूजाविधि:, 27 शिवरात्रिविधि:, 28शिवरात्र्यर्चनविधि:,29लिङ्गस्थापनविधि:, 30 मण्टपाराधनम्, 31आचार्यलक्षणम्, 32 शिष्यलक्षणम्, 33 क्रियादीक्षा, 34 ज्ञानदीक्षा, 35 शिवदीक्षा, 36 समाधिलक्षणम्, 37 तत्वनिर्णयविधि:,38 सन्मार्गचक्रलक्षणम्, 39 समाधिराजविधि:, 40आधारनिर्णयविधि:, 41खननान्त्येष्टिविधि:, 42 साध्वशुध्यन्त्ये-ष्टिविधि:, 43 निरध्वशुध्यन्त्येष्टिविधि:,44 उत्सवप्रकरणपटल:, 45 ध्वजाङ्कुरम्, 46 वृषोधिवासनम्, 47 ध्वजारोहनम्,48भेरी-ताडनम्, 49 उत्सवाङ्कुरम्, 50 कौतुकबन्धनम्, 51 मण्डपलक्षणम्, 52 वास्तुबलि:, 53 मण्डपपूजा, 54 शिवयागम्, 55शिवयागबलि:, 56 उत्सवयानम्, 57 बलिदानम्, 58 ब्रह्मोत्सवम्, 59 नटेशोत्सवम्, 60 अश्वादिरोहनम्, 61 रथारोहनम्, 62 तीर्थकर्म, 63चूर्णोत्सव:, 64 तीर्थस्नानम्, 65 घटस्नानम्, 66 ध्वजावरोहणक्रमम्, 67 मौनबलि:, 68.शिवोत्सवप्रायश्चित्तम्

इति अष्टषष्टिपटला: लभ्यन्ते, शैविकसमाजे अस्यागमस्य स्थानं अत्युन्नतं भवति,

अयमागममनुस्रुत्य आलयादिषु प्रतिष्टोत्सवादि करणेन वयं अत्यन्तं पुन्यं प्राप्नुम:

तदुक्तं चिन्त्यागमस्य शिवोत्सवप्रायश्चित्तविधिपटले-

"उत्सवारोहणं कुर्यात् लब्धा स तु बुद्धिमान् ।
इह लोके भवेद्वत्वं शिवसायुज्यमाप्नुयात्" ।।

अनेन वचनेन अस्यागमस्य उत्सवादि पटलानां अनुसरणेन अनुष्टातार: शिवसायुज्यं प्राप्नुवन्तीति ज्ञायते।

वयमपि एनं महत्वपूर्णं चिन्त्यागमं अनुष्ठाने प्राप्य इहपरसुखान् प्राप्नुम: ।।

सन्दर्भ ग्रन्थः

[1] उत्तरकारणागमः - तन्त्रावतारपटलः श्लोकौ १०।